International Research Journal of Human Resources and Social Sciences
Vol. 2, Issue 11, Nov 2015 IF- 2.561 ISSN: (2394-4218)
© Associated Asia Research Foundation (AARF)
Website-www.aarf.asia, Email:editor@aarf.asia, editoraarf@gmail.com

# धर्मशास्त्रस्य प्रयोजकता

**प्रो. भगवती सुदेश**

भारतीयवाङ्मये शब्दः इयान् महत्त्वपूर्णः सारगर्भितः नमनीयः'धर्म'चास्ति यत् अन्यस्यां कस्यामपि भाषायां कोऽपि शब्दः तत्समानार्थकतां न भजते। अद्यत्वे सम्प्रदाय-पंथादिं लक्ष्यीकृत्य प्रयुज्यमानो धर्मशब्दः तदीयः संकीर्णः एकदेशीयश्च प्रयोगो वर्तते। वस्तुतः, अतीव व्यापकोऽयं धर्मशब्दः वर्णधर्म-वर्णाश्रम-गुणधर्म-सामान्यधर्म-आपद्धर्मादीन् अन्तर्भावयति। भारतीयधर्मशास्त्राणि ज्ञान-विज्ञानयोः अगाधः पारावारः येषां प्रणयनम् अस्माकं महर्षीणां गहनतपोऽध्ययनानुभूतीनां परिणामः। धर्मशास्त्राणि मानवस्य पशोश्च अन्तरं स्पष्टयन्ति। अस्माकं धर्मशास्त्रीयपरम्परा मानवमात्रं केन्द्रीकृत्य आविर्भूता । तत्र उत्कृष्टतायाः आदर्शस्य च महनीयता वर्तते यां मनुः स्वयमेव प्रकीर्तितवान् -

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

वैदिको धर्मः द्विविधः- प्रवृत्तिपरः निवृत्तिपरश्च। यज्ञतपोदानादयः प्रवृत्तिपराः, भगवद्भक्ति-ब्रह्यात्मविचरप्रभृतयो निवृत्तिपराः धर्माः। प्रवृत्तिलक्षणस्य धर्मस्य फलं लौकिकपारलौकिकोत्कर्षात्मकः अभ्युदयः। निवृत्तिरूपधर्मस्य फलम् आवागमननिवृत्यात्मकं निःश्रेयसम्। तत्र मनुः प्रवृत्यात्मकान् धृतिक्षमादमशमसत्यादीन् साधारणधर्मान् प्रत्यपादयत् -
सुखाभ्युदयिकं चैव नैःश्रेयसकमेव च।'
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्॥
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।

निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते।।'

इमे साधारणधर्मास्तु निवृत्तिमार्गिणोऽपि उपकुर्वन्ति। मनुना उपदिष्टं यत् प्रवृत्तिः यदा निवृत्तौ पर्यवस्यति तदैव सा प्रवृत्तिः सार्थकतां भजते - 'प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला।' (५/५६) इति।

धर्मशास्त्रेषु महर्षिभिः विधिनिषेधयोः उभयोः निर्देशः प्रदत्तः, यस्योपेक्षा उत अवज्ञा कदापि हितकरी न स्यात्। वस्तुतः, मानवता नाम मर्यादा इति। मर्यादायां विधिनिषेधात्मिके द्वे पर्वणी भवतः। तत्र 'इदं कुरु' इति विधिः, 'इदं मा कुरु' इति निषेधः। 'इदं कुरु' इति विधेः तात्पर्यम्- इदं ते इष्टसाधनम्। 'इदं मा कुरु' इति निषेधस्य आशयः- इदं ते अनिष्टसाधनमिति। यो मानवः विधिसम्मतं नाचरति निन्दितं च सेवते, स मर्यादाभङ्गत्वात् पतति। याज्ञवल्क्यः इदं पतनमेव तस्य विनाशम् अभिप्रैति-

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।'

अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।।' (३/२१९)

किं कर्तव्यम्, किञ्च न कर्तव्यमिति धर्मशास्त्रैरेव ज्ञायते। धर्मशास्त्राभिमुखां संपूर्णनिष्ठाम् आधाय तद्दर्शितपन्थानम् अनुसृत्यैव मानवजीवनं सार्थकं कर्तुं शक्यते । यथोक्तम् – धर्म एव हतो हन्ति धर्मो ' । अर्थात् यो धर्मं रक्षति धर्मः तं रक्षति।'रक्षति रक्षितः

भारतीयं धर्मशास्त्रसम्बद्धं साहित्यम् अतीव विस्तीर्णम्। तत्र विविधविधानां धर्माणां वैशिष्ट्यं सविस्तरं निरूपितं वर्तते। धर्मशास्त्रीयां सरणिम् अनुसृत्य भाविनि काले धर्मस्य प्रतिपादनं कठिनायेत इति तथ्यमिदं समभिज्ञाय धर्मशास्त्रकारैः समासतः कतिपयाः मुख्यभूताः विषयाः प्रतिपादिताः। तैः समग्रा धर्मसमष्टिः तपो ज्ञानं यशो दानमिति चतुर्धा निरूपिता। अतएव धर्मः चतुष्पादोऽभिधीयते। कृतयुगे धर्मस्य चत्वारोऽपि पादाः मनुजैः सम्यग् अपाल्यन्त। त्रेतायां तपसः ह्रासत्वात् पादत्रयम् अवाशिष्यत। ज्ञानस्य ह्रासंगत्वात् द्वापरे पादद्वयमेवपालितमभूत। वर्तमाने कलियुगे यज्ञस्यापि ह्रासत्वातेकलो दानपाद एव शिष्यते। साम्प्रतिके युगे मानवजीवने अर्थार्जनं लक्ष्यते मुख्यभूतम्। अस्माद्धेतोः अर्जितवित्तात् कश्चन भागो दानत्वेन उपयोक्तुं शक्यते। ननु, दानमात्रेण मानवजीवने धर्मपरायणता आविर्भूता स्यादिति न। अतः तस्य दिनचर्यायामपि यथासम्भवं यथायोग्यं शास्त्रसम्मतः परिष्कारः अभीष्टः। धर्मशास्त्रेषु दिनचर्याम् आचारञ्च उद्दिश्य प्रभूता समाग्री उपलभ्यते । उभयोरपि प्रतिपादनं वर्तते। धर्मशास्त्रेषु गृहस्थाश्रमस्य महिमा सर्वोत्कृष्टतया प्रकीर्तितः

आचार्यैः यतः अवशिष्टानाम् आश्रमाणाम् आधारस्तु गृहस्थ एव खलु वर्तते। उक्तं यथा-

गृहस्थ एव यजते गृहस्थः एव तपते तपः।

चतुर्णामाश्रमाणां तु गृहस्थ एव प्रशस्यते ॥

यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम्।

तथा गृहस्थमाश्रित्य सर्वे जीवन्ति जन्तवः ॥

अधोलिखितं महाभारतीयं वचनमपि गृहस्थाश्रमस्य महिमानं कीर्तयति-
यथा मातरमाश्रित्य सर्वे जी'वन्ति जन्तवः।
तथा गृहस्थाश्रमं प्राप्य सर्वे जीवन्ति जन्तवः॥'

धर्मशास्त्राणां विषयवस्तु अतीव व्यापकम्। समाजः, भूगोलः, पर्यावरणम्, धर्मः, नीतिः, राष्ट्रियता, कर्मकाण्डः, व्यवस्था, अपराधः, दण्डः, अर्थः, कामः, मोक्षश्चेत्यादीनाम् बहुविधविषयाणां सैद्धान्तिकं व्यावहारिकञ्च प्रतिपादनं सविस्तरं लक्ष्यते। एतानेव सिद्धान्तान् आश्रित्य महर्षयः सर्वेषां सुखमयं शान्तिमयं निरामयञ्च जीवनम् अकल्पयन्त। मानवजीवनेन सम्बद्धः न कोऽपि विषयः अवशिष्यते यत्र धर्मशास्त्राचार्याणां दृष्टिः न गता। राजा-प्रजा, मातापितरौ, पुत्रपुत्र्यौ, स्त्रीपुंसौ, जडचेतने, कर्माकर्मणी, खाद्याखाद्ये, पापपुण्ये, समाजस्य प्रत्यङ्गम् आश्रितवतां जनानां स्वभावम् तेषाम् अपेक्षाश्च अवधाय स्मृतयः प्रवृत्ताः। इमाः स्मृतयः सार्वजनीनाः, सार्वभौमिक्यः, सार्वकालिकाः सर्वजनावगम्याश्च सन्ति। स्मृतिपरम्परायाः प्रवर्तनं आचार्यमनोः कालात् अभवत् येषां विषये ऋषयः अवोचन् यत् मनुरेव अस्य समग्रस्य अपौरुषेयस्य अचिन्त्यस्य अप्रमेयस्य च वेदराशेः अग्निष्टोमादियज्ञकार्यस्य ब्रह्मनश्च ज्ञाता वर्तते नान्यः-

त्वमेको ह्रस्व सर्वस्य विधानस्य स्वयंमुवः।

अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित् प्रभो ॥ (मनु. 1/3)

एतादृश्यां दशायां सैव स्मृतिः प्रमाणं भवितुमर्हति या श्रुत्यनुगुणतां आदधाना मनुयाज्ञवल्क्यतुल्यानाम् आप्तर्षीणाम् ऋतम्भरय प्रज्ञया से अनुमोदिताः स्युः, यतोहि धर्मसास्त्रस्य

मार्गदर्शनम् आचार्यादेव स्यात्। मनुः आचार्यं परिभाषमाणः आह यत् यः द्विजः शिष्यम् उपनीय तं सकल्पं सरहस्यञ्च वेदम् अध्यापयेद्  स एव आचार्योऽभिधीयते। अर्थात् शास्त्रीयसिद्धान्तानां प्रतिष्ठापनं तत्प्रसारणं स्वीयाचरणनिष्ठा च आचार्यत्वं कथ्यते। यो हि आचार्यत्वमिदम् अनुपालायेत् स एव खलु आचार्यपदभाक् इति।

श्रुतिस्मृतिभिरेव धर्म आदिश्यते धर्मस्य निर्धारणे ता एव प्रमाणभूताः। आचार्यो मनुः धर्मस्य निर्धारणे श्रुतिस्मृतिभ्यां निरूपितं, शिष्टानामाचरणम्, आत्मनः सन्तुष्टिञ्च प्रमाणं मनुते। यो हि मनुजः ऋषिदृष्ट वेदं तथा तन्मूलकं स्मृतिशास्त्रं च को वेदानुरूपेण तर्केण अनुसन्धत्ते स एव धर्मज्ञो नान्यः। मनुना वेदस्य सर्वज्ञानमयत्वं सकलपुरुषप्रवृत्तिमूलकत्वञ्च साधयितुं प्रमाणरूपाणि उदीरितानि,  यथा -

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः ।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।

मनुः मानवधर्मशास्त्रस्य प्रवर्तको मन्यते। मनुस्मृतौ सर्वेषां अर्णानां आचारव्यवहाराणां कर्तव्यानाञ्च निर्देशो लभ्यते। स्मृतिरियं सर्वसाधारणाय अतीवोपयोगी धर्मविषयको ग्रण्थऒ वरीवर्ति। याज्ञवल्क्यस्मृतौ आचारव्यवहारप्रायश्चित्ताख्याः बृहदध्यायाः सन्ति यत्र आचारव्यवहारयोः नियमानां विशदं विवेचनम् अभवत्। आचारव्यवहारदृशा पराशरस्य नारदस्य च स्मृती अपि महत्त्वपूर्णे।

महर्षिः पराशरः प्रत्यपादयत् यत् भगवता प्रदत्ता या श्रुतिस्मृत्यात्मिका आज्ञा सा न केवलं भारतस्य कृते एव न अपितु निखिलविश्वस्य हितमुद्दिश्य वर्तते। अपि च, इदमेव समस्तस्य  विश्वस्य शासनात्मकं विधानम् । **'शासनाच्छंसनाच्छास्त्रम्'** । लघुतमं राष्ट्रं संचालयितुमपि संविधानम् अपेक्षते चेत् समग्रविश्वस्य शासनायापि विधानमावश्यकं भवति। अतः भगवान् तदर्थं विधानं रचयत्येव। भगवता निर्मितं तदेव विधानं नाम शास्त्रमिति ।

वेदं गृहीत्वा यः कश्चिच्छास्त्रं चैवापमन्यते ।

स सद्यः पशुतां याति संभवनिकाविंशतिम् ।। (अत्र संहिता 1/11)

श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते ।

काणस्तत्रैकया हीनो द्वाम्यामन्धः प्रकीर्तितः ।। (वाघूलस्मृति 190-91)

सर्वासु स्मृतिषु मनोः स्मृतिरेव मूर्धनि तिष्ठति। आचार्यैः मन'ृवर्थ विपरीता तु या स्मृतिः सा न शस्यते' ।। (मनु 1.1 - मन्वर्थमुक्तावली टीका) इत्युद्घोष्य मनोः वैपरीत्यमाचरन्ती काऽपि अन्या स्मृतिः नानुमोदिता। कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां निगदितम्– यद् वै किंच ' 'मनुरवदत् तद्भैषजम् । अर्थात् मनुना उपदिष्टं सर्वमपि मनुजस्य हितसाधकम्। बृहस्पतिस्मृतिरपि इदमेव मनुते– 'वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतम्' । मनुना प्रतिपादितं यत् जीवने धृतिः, क्षमा, दमः, अऽस्तेयं, शौचम्, इन्द्रियनिग्रहः, धीः, विद्या, सत्यम्, अक्रोधश्चेति दशपदार्थानां धारणं नाम धर्मः।

'धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।

धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्' ।। मनुः 6/92 स्

श्रुतिस्मृतीहासपुराणेषु तेषां आधारभूतानाम् आदर्शानां विशदं विवरणं प्राप्यते ये मानवस्य चरित्रनिर्माणे हेतुभूताः । याज्ञवल्क्यः आह-

इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।

अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ।

धर्माचार्यैः पारम्परिकः सदाचार एव धर्मस्य सर्वश्रेष्ठं लक्षणम् अङ्गीक्रियते। सुविदतमेव यत् लोके कालक्रमेण परिस्थितिषु परिवर्तनं जायते। देशभेदोऽपि सांस्कृतिकं भेदं जनयति। भिन्नबिन्नजातिसम्प्रदायादीन् अवलम्बिभिः सह संसृष्टत्वादपि सांस्कृतिकं सम्मिश्रणम् अपरिहार्यम्। परिणामतः मनुजः स्वीयं कुलसम्मतं सदाचारं त्यजेच्चेत् तस्य जीवनसरणिः दोषायेत। तपसा मानवजीवने पावित्र्यम् आदधानः पारम्परिकोऽयं सदाचार एव एतेभ्यो दोषेभ्यः त्रायते। अत एव 'आचारः परमो धर्मः' इत्युच्यते। यैः आचारैः विचारैश्च मनुजे दैवगुणा आविर्भावम् अभिवृद्धिञ्च अवाप्नुयुः ते एव सदाचारसंज्ञकाः। सदाचारशीलस्य समादरः यस्मिन् समाजे जायते स एव समाजः समुन्नतिं विन्दते। सदाचारवन्तो जनाः कष्टापन्नाः सन्तोऽपि अन्तस्तले सद्गुणैः सर्वदा प्रसादयुता एव लक्ष्यन्ते। गीतायाम् उक्तं भगवता- न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति ।। (6/40)

भारतीयायाः संस्कृतेः अयमेव विशेषो यदेषा आचारविचारादिकं मूर्धनि प्रतिष्ठापयति। भारतस्य सांस्कृतिकचेतना न केवलं अन्तःकरणं पुनाति अपितु अभ्युदयं निःश्रेयसञ्चापि प्रापयति। वर्तमानकाले मानवीयैः मूल्यैः विमुखायमानायै मानवतायै अभिनवा दिशा मूल्यशिक्षयैव प्रदातुं शक्यते येन जीवनं समुचुतदिशि अग्रेसरेत्, पुनश्च आस्माकीनः समाजः असतो सद्, तमसो ज्योतिः, असाधुतायाः शिष्टतां, पापात् पुण्यञ्च नेतुं शक्येत। अत्रावधेयं यत् मूल्यानां विकासः प्रचारमात्रेण विधातुं नाशकम्। मूल्यानां पल्लवनं पोषणञ्च कामपि जटिलां व्यापिकां च प्रक्रियामाश्रयति। अनया प्रकियया मूल्यानाम् आधानेन सह व्यक्तेः व्यक्तित्वमपि सम्पूर्णतया सन्तुलितरूपेण परिष्कारं समुन्नतिं चाप्नोति। धर्मशास्त्रं प्रतिपदं विचारममुं द्रढयति। आजीवनम् अनुष्ठीयमानाः संस्काराः मानवे मानवोचितानां गुणानाम् अन्तर्निवेशनमेव खलु उद्दिशन्ति। उक्तं च- आचारहीनं न पुनन्ति ' 'वेदाः इति। धर्मशास्त्राणां सम्यग् अनुशीलनेन द्वौ प्रमुखौ सिद्धान्तौ दृष्टिपथमायातः। तत्र आद्यः वर्तते बाह्याचरणात्मकानां नैकेषां नियमानां प्रवर्तने अन्तःकरणे बलप्रदानम्। मनुना उदीरितं यत् तदेद् आचरेत् मनुजः यत् तस्मै आत्मशान्तिं प्रयच्छेत्। परलोके सदाचार एव सहयात्री स्यात्, न पितरौ न भार्या न च सन्ततिः। उक्तं केनचित्-

धनानि भूमौ पशवश्च गोष्ठे नारीगृ हद्वारि जनाः श्मशाने ।

देहश्चितायां परलोकमार्गे धर्मानुगो गच्छति जीवलोकः ।

अतः अस्मत्यन्तनिष्ठया सदाचारिजीवनयापनस्य कला धर्मशास्त्रस्य स्वाध्यायात् ग्रहणीयः।

अपरः सिद्धान्तो वर्तते 'तत्त्वमसि' इति दार्शनिको विचारः यः प्रत्येकव्यक्तौ एकस्यैव आत्मनः अभिव्यक्तिं सूचयति। धर्मशास्त्रेषु दयाक्षमाहिंसाप्रभृतीन् गुणान् आविष्कर्तुम् उपदिश्यते तत्र एषैव दार्शनिकी विचारधारा हेतुभूता। शास्त्रेऽस्मिन् नैतिकतायाः अध्यात्मस्य च सहगमनं लक्ष्यते। स्वामिविवेकानन्दः अवोचत् यत् धर्मः अनुभूतिविषयः। तदनुसारं धर्मो नाम आत्मा ब्रह्मेति ज्ञानम्, तद्रूपतायाः सम्पादनम्, तस्य साक्षात्कारश्चेति। अयं धर्मः कश्चन प्रवचनस्य अथवा अङ्गीकारस्यैव विषयो न प्रत्युत मनसा प्राणैः विशवासेन च सह एकात्मतायाः विषयो वरीवर्ति। को न जानाति यत् समाजे अनुशासनशृङ्खलां व्यवस्थाञ्च अनुरक्षितुं धर्मशास्त्राणाम् अवदानम् उल्लेखनीयम् अविस्मरणीयं चास्ति। 'तेन त्यक्तेन भुञ्जीथाः', तथा 'सहस्रशः वितर' इत्याद्युपदेशैः समाजे यस्याः

धार्मिकास्थथायाः उदयो जायते तेन जनानां मध्ये सम्पदां समुचितं वितरणं विभाजनं च बलमाप्नोति, यतोहि ***आवश्यकतायाः अधिकसञ्चयनं अर्जनं वा चौर्यसमं भवति।*** कस्यापि विधानस्य उद्देश्यं भवति समाजस्य संचालनं संरक्षणं समुन्नयनञ्च। मनुः एतदेव लक्ष्यीकृत्य श्रुत्यनुरूपं चतुर्णां वर्णानां चतुर्णाम् आश्रमाणाञ्च प्रतिष्ठापनम् अकरोत्। अतः तस्य संरक्षणार्थं धर्मशास्त्रकारैः प्रतिपादितायाः मानावधर्मरूपायाः अस्मत्संस्कृतेः आश्रयः अङ्गीकरणीयः। मनुजस्य हृदि उचितानुचितानां संस्काराणां पोषणस्य हेतुर्भवति तस्य भाषा, वेषः, आहारविहारः, चरित्रादि। तत्र संस्कार-संस्कृत्योः अभेद एव वरीवर्ति। अतः भाषावेषादीनां चतुर्णां समवाय एव संस्कृतिरिति वक्तुं शक्यते। यत्तु आहारस्य विषयो वर्तते, अस्माकं देशस्य आहारे कन्द-मूल-फल-शाक-अन्न-पयः-दधि-घृतादयः सात्त्विकाः पदार्था एवासन्। एवंविधैः सत्त्वप्रधानेन आहारेण बुद्धौ सात्त्विकताया उदयो जायते, अन्तःकरणं शुद्ध्यति, आध्यात्मिकविषयस्य स्मृतिः प्राप्यते- आहारशुद्धौ सत्त्वशुद्धिः',सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलाभे सर्वग्रन्थीनां विप्रमोक्षः।' गीतायामपि उक्तम्-

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।

रस्याः स्निग्धाः स्थिरा हृद्याः आहाराः सात्त्विकप्रियाः ।। (गीता 17/8)

याज्ञवल्क्यस्मृतिकालेऽपि कानिचन विधानानि पूर्णतया प्रांसगिकतां भजन्ति स्म । तेषु कानिचन साम्प्रतमपि विद्यमानानि सन्ति । याज्ञवल्क्यस्मृतौ प्रतिपादितमस्ति -

देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् ।

पात्रे प्रदीयते यत्तत् सकलं धर्मलक्षणम् ।।

अत्र ध्यातव्यमस्ति यत् स्मृतिषु  शब्दस्य यस्मिन् अर्थे प्रतिपादनम् अस्ति तस्मिन्नर्थे'धर्म' वर्तमानभारतीयसंविधाने न दृश्यते । अस्मिन् परिप्रेक्ष्ये यदि पश्यामः तदा अद्यापि राष्ट्रपति-प्रधानमन्त्रि-मुख्यमन्त्रिप्रभृतयः राज्यस्तरीयविभिन्नकार्यक्रमेषु शिक्षा-कला-चिकित्सा-विज्ञान-चलचित्रादिक्षेत्रेषु उत्कृष्टेभ्यः पात्रेभ्यः दानस्वरूपेण पुरस्कारं वितीर्य धर्मलक्षणानि प्रकटयन्ति । याज्ञवल्क्येन स्वाध्यायस्य गणना धर्मे एव कृता । वस्तुतः विकासशीलजीवनाय ग्रन्थानाम्

आवश्यकता वर्तते येभ्यः जीवनस्य मार्गदर्शनं प्राप्यते। वेदैः यद् उद्घोषितम् 'सर्वे भवन्तु सुखिनः' इत्येतत् लक्ष्यं पूरयितुं याज्ञवल्क्यस्मृतौ यानि धर्मतत्त्वानि नैतिकमूल्यानि च विद्यन्ते तेषां परिपालनं मनसा वचसा कर्मणा च आत्मसात्कर्तव्यम् । यतोहि उपर्युक्तधर्मतत्त्वानि वर्तमानकालेऽपि प्रासंगिकतां धारयन्ति । संभवतः अस्मिन् समये तेषां अत्यधिका आवश्यकता वर्तते । नैतिककर्त्तव्यानि परिपालयन्तो मानवाः समाजे परस्परं प्रीतिमभिवर्धयन्ति सुखवृष्टिं च कुर्वन्ति। यदा यदा मानवैः नैतिकमूल्यानि अवमानितानि तदा तदा धनधान्यादिपरिपुष्टैरपि मानवैः कलहकारिण्या दुर्वृत्त्या, सद्बुद्धिनाशिन्या कुगत्या दुःसहानि वक्तुमशक्यानि दुःखानि सञ्चितानि। अपि च, राष्ट्रस्य समाजस्य परिवारस्य स्वस्य आत्मनश्च पतनमेव जातम्।

अद्य अपसंस्कृतेः कदाचारस्य च यो हि प्रसारो अस्माकं समाजे लक्ष्यते तत्र मुख्यं कारणं भवति -मनुप्रोक्तस्य धर्मस्य, सदाचारस्य, चरित्रस्य च उपेक्षा। धर्मशास्त्रे निरूपिता शिक्षा इदं निर्दिशति यन्मानवाः साभ्युदयाः सन्तु, मा सन्तु कदापि निरभ्युदयाः। आश्रमव्यवस्थायाः पतनं मानवजातेः पतनस्य कारणमभूत्। भारतीया संस्कृतिः भवति मानवधर्मरूपा। सैव अस्मान् रक्षितुं क्षमा। भारतीयाः संस्काराः गर्भाधानाद् आरभ्य अन्त्येष्टिपर्यन्तं मानवं पुनन्ति। तेषु संस्कारेषु केचन देहं संस्कुर्वन्ति, केचन आत्मानं संस्कुर्वन्ति। देहः स्नानादिना संस्कारमुपैति, आत्मा च जपादिना संस्कृतो जायते। सर्वेषां संस्काराणां विधाने अनुष्ठाने च धर्मशास्त्रमेव भवति उपकारकम्।

धर्मशास्त्रविहितैः संस्कारैः संस्कृताः जना एव सुसंस्कृतं समाजं रचयन्ति। अतएव धर्मशास्त्रं समाजश्च मिथः साक्षात्सम्बन्धम् आवहतः इति नास्ति सन्देहलेशावकाशः। अन्यैः शास्त्रैः समाजो न तथा सम्पृक्तः यथा धर्मशास्त्रेण। स्पष्टं यत् धर्मशास्त्रीयपरम्पराणाम् आचरणेन समाजः संस्कृतो जायते तदुपेक्षया तु विश्रृंखलां समाजं नूनं आवरिष्यत्येव। अतः अस्त्येव संस्कृतेः सरंक्षणे संवर्धने च धर्मशास्त्रस्य अविस्मरणीयम् उल्लेखनीयञ्च योगदानम् । शास्त्रीयपरम्पराः अनुसृत्यैव सामाजिकसमस्यानाम् उचितं समाधानं प्राप्तुं शक्यते । वेदेषु मनुष्याणां जीवनविवृद्ध्यर्थं सर्वाः प्रवृत्तयः प्रदिष्टाः। मन्वादिभिः सर्वशास्त्रविद्भिः समस्तान् मनुष्यान् सुखयितुं वेदानुमताः सर्वे नियमा विनिर्मिताः। आद्यधर्मशास्त्रकारेण मनुना स्वकीये स्मृतिग्रन्थे सामान्यधर्मा विशेषधर्माश्च विवर्णिताः। राजधर्मप्रकरणं पठित्वा सहजतयैव समवगम्यते यत् धर्मराजभीत्योरेकात्मता विद्यते। अत एव धर्मग्रन्थें राजधर्मपदं प्रयुक्तं न तु राजनीतिपदं प्रयुक्तम् । राजनीतिरेका शासनव्यवस्था विद्यते सा च

व्यवस्था येन बलवती स्थिरा प्रजाजनप्रशंसनीया वा भवति स खलु धर्मः । राजानमुद्दिश्य देवपदं प्रयुज्यते। यथा देवाः स्वधर्मं नोल्लङ्घयन्ति तथा राजा अपि शास्त्रोपदेष्टान् नियमान् नोल्लंघयति। शास्त्रग्रन्थेषु वर्णितं यद् राजनि देवानां वासो भवति । सर्वे देवा राजनिर्मितौ निजं निजं यशः प्रयच्छन्ति। अत एव दिव्यांशप्रोद्भूतोऽयं राजा। मनुना कथितं यत् यदा राजा इन्द्र इव पूर्णैश्वर्यवान्, वायुरिव सर्वमनुष्येषु प्राणवान्, यम इव पक्षपातशून्यतया न्यायकर्ता, सूर्य इव विद्यानां प्रकाशयिता अज्ञानतिमिरस्य च नाशयिता, अग्निरिव दुष्टानां भस्मकृत्, वरुण इव शत्रुजनविद्रावकः, चन्द्र इव शान्तिकर्ता, कुबेर इव कोशस्य पूरयिता भवति, स्वात्मनि देवांशं बिभर्ति। (मनु 7-4 )

एतेन प्रतीयते यद् राजा तपस्वी भवति। स्वराज्यं निष्कण्टकं कर्तुं स एव राजा प्रभवति यस्य शासने दण्डव्यवस्था शास्त्रानुवादिनी निज-अपरपक्षचिन्तनदोषविनाशिनी च भवति । यदा राजा धर्मनिष्ठो भूत्वा दण्डं प्रदर्शयति तदाऽसौ प्रशस्यो नमस्यश्च, यदा च अधर्मनिष्ठो भूत्वा दण्डं प्रदर्शयति तदा लोकनिन्द्यो भवति। यथा - मनु- 7/16 से 18, 20-24 )। राजकर्मणः सञ्चालनाय या परिषद् भवति तस्यां परिषदि ये विद्वांसः स्युस्ते धर्मानुसारं यामपि व्यवस्थामुचितां मत्वा विचारं प्रसारयेयुः तामेव सर्वेऽपि जनाः स्वीकुर्युः । परिषदि सर्वेऽपि सदस्या वेदविद्यापारङ्गता न्यायशास्त्रनिष्णाता निरुक्तज्ञानिनो धर्मसारवेत्तारश्च भवेयुः । स्मृतिशास्त्रे या न्यायव्यवस्था दण्डव्यवस्था च प्रदत्ता, सम्प्रति संविधाने प्रायः सैव व्यवस्था वर्तते । समयक्रमं समपेक्ष्य किञ्चिदिव परिवर्तनं जातं, परं तथापि प्राग्वर्तिनी या आसीत् सैव गृहीता।

**उपसंहारः-**

जगति मनुजस्य प्रशस्तं श्रेष्ठञ्च मित्रम् धर्म एव। परलोकेऽपि अयमेव उपकरोति। धर्ममतिरिच्य नान्यः कश्चन तत्र भवति -‘धर्मस्तिष्ठति केवलम्‘ ।

भारतभूमिः पुराकालादेव तदीयानां ज्ञानधर्ममूल्यादीनां कारणात् विश्वस्मिन् विश्वे महनीयं स्थानं धत्ते। **स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः** इति उपदेशेन सिद्धं यत् भारतीयधरैव विश्वे नैतिकान् आदर्शान्, जीवनमूल्यानि च प्रासारयत् । धर्मो धर्मशास्त्रञ्चैव भारतस्य आत्मा। तदभावे अस्माकं, अस्मद्राष्ट्रस्य निखिलमानवताश्च अस्तित्वमेव संकटापन्नं जायेत। धर्मस्य नैतिकशिक्षायाश्च अभावे बालाः संस्कारशून्या भवेयुः इति निश्चप्रचम्। वयम् अवलोकयामो यत्

साम्प्रतं संस्कारशून्याः युवानः पाश्चात्यजगतः अपसंस्कृतेः पाशे बद्धाः। महान् धर्माचार्यः स्वामिकरपात्रीवर्याः बहुधा अवोचन्- 'धर्मनियन्त्रिता राजनीतिरेव मंगलकरी, धर्मविहीना राजनीतिः दुर्नीतेः रूपम् आधाय सर्वविधान् विकारान् जनयति। धर्मेण अनियन्त्रिता राजनीतिः अधर्मिणाम् अनभीष्टतत्त्वानाम् अङ्गभूता जायेत' । मनुजो धर्मस्य मर्म अवबुध्यात्, सात्त्विकाचरणस्य महत्त्वं जानीयात्, पापपुण्ये, नीत्यनीत्यौ अभिज्ञातुम् अर्हेत्, देव-पितृ-अतिथि-गुरुप्रभृतीन् प्रति स्वीयं कर्तव्यं जानीयात्, सर्वदा धर्मसम्मते कर्तव्यपथि च सर्वदा अग्रेसरः भवेदित्येव धर्मशास्त्रस्य प्रधानभूतं लक्ष्यम्।

**-: सन्दर्भग्रन्थसूची :-**


1. आधुनिकहिन्दुविधिः, डॉ.योगेन्द्र कुमार तिवाडी, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, 2003
2. कौटिल्य-अर्थशास्त्रम्, व्या.डॉ.कमलनयन शर्मा, जगदीश संस्कृत पुस्तकालय, 2007
3. दत्तकमीमांसा, नन्दपण्डित
4. धर्मशास्त्रस्येतिहासः, प्रो. जयकृष्णमिश्रः, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 2010
5. धर्मशास्त्र का इतिहास, डॉ.पाण्डुरङ्ग वामन काणे, उत्तरप्रदेश हिन्दी संस्थान, 1992
6. मनुस्मृतिः,
7. कल्याण, धर्मशास्त्रांक, गीताप्रेस गोरखपुर
8. याज्ञवल्क्यस्मृतिः, गङ्गासागरराय, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1999
9. व्यवहाराध्यायः, डॉ.कमलनयन शर्मा, जगदीश संस्कृत पुस्तकालय, 2009
10. व्यवहारमयूखः, पी.वी.काणे, राष्ट्रिय संस्कृत संस्थान, नईदिल्ली, 2009
11. संस्कार विमर्श, प्रो.भगवती सुदेश, राष्ट्रिय संस्कृत साहित्य केन्द्र, जयपुर, 2008